## किंवृत्तं च चिदुत्तरम्। (४८/३९५५)

किमो वृत्तं किंवृत्तम्। [1]किंवृत्तग्रहणेन तद्विभक्त्यन्तं [2]प्रतीयात्, डतरडतमौ च [3]प्रत्ययौ। तत् किंवृत्तं चिदुत्तरमविद्यमानपूर्वं [4]यत् तेन युक्तं तिङन्तं [5]नानुदात्तम् भवति। कश्चिद् भुङ्क्ते। कश्चिद् भोजयति। [6]कश्चिद् अधीते[7]। केनचित् करोति। कस्मैचिद् ददाति। कतरश्चित् करोति। [8]कतमश्चिद् भुङ्क्ते। चिदुत्तरम् इति किम्? को भुङ्क्ते। अपूर्वम् इत्येव, देवदत्तः किञ्चित् पठति॥

## आहो उताहो चानन्तरम्। (४९/३९५६)

[9]निघातप्रतिषेधोऽनुवर्तते, अपूर्वम् इति च। आहो उताहो इत्येताभ्याम् अपूर्वाभ्यां युक्तम् अनन्तरं तिङन्तं नानुदात्तं भवति। आहो [10]भुङ्क्ते[11]। उताहो भुङ्क्ते[12]। आहो [13]पठति। उताहो पठति। [14]अनन्तरम् इति किम्? शेषे विभाषां (८.१.५०/३९५७) वक्ष्यति। अपूर्वम् इत्येव, देवदत्त आहो भुङ्क्ते। देवदत्त उताहो भुङ्क्ते॥

## शेषे विभाषा। (५०/३९५७)

आहो उताहो इत्येताभ्यां युक्तं तिङन्तं नानुदात्तम् शेषे विभाषा भवति। कश्च शेषः? यदन्यदनन्तरात्। आहो देवदत्तः पचति, [15]पचति। उताहो देवदत्तः पचति, [16]पचति। आहो देवदत्तः पठति, पठति। [17]उताहो देवदत्तः पठति, पठति॥

## गत्यर्थलोटा लृण् न चेत् कारकं सर्वान्यत्। (५१/३९५८)

गमिना समानार्था गत्यर्थाः। गत्यर्थानां[18] लोट् [19]गत्यर्थलोट्। तेन [20]गत्यर्थलोटा युक्तं लृडन्तं तिङन्तं नानुदात्तं भवति, न चेत् कारकं [21]सर्वान्यद् भवति। यत्रैव कारके कर्तरि कर्मणि वा लोट्, तत्रैव यदि लृडपि भवति इत्यर्थः। कर्तृकर्मणी एवात्र तिङन्तवाच्ये कारकग्रहणेन गृह्येते, न करणादि कारकान्तरम्। आगच्छ देवदत्त ग्रामम्, द्रक्ष्यसि एनम्। आगच्छ देवदत्त ग्रामम्, ओदनं भोक्ष्यसे। उह्यन्तां देवदत्तेन शालयः, तेनैव भोक्ष्यन्ते। उह्यन्तां देवदत्तेन शालयः, यज्ञदत्तेन [22]भोक्ष्यन्ते।

गत्यर्थग्रहणं किम्? पच देवदत्त ओदनम्, भोक्ष्यसे एनम्। लोटा इति किम्? आगच्छेः देवदत्त ग्रामम्, द्रक्ष्यसि एनम्। लृट् इति किम्? आगच्छ देवदत्त ग्रामम्, पश्यसि एनम्। न चेत् कारकं सर्वान्यत्

---

1. किं नास्ति ब. 2. प्रतीयते इ. 3. प्रत्ययौ नास्ति इ.ह. 4. जात्वनुयुक्ते निघातप्रतिषेधकारणं इत्यधिकम् क. 5. च इत्यधिकम् क. 6. किंचिदधीते ब. क. 7. कश्चित् कूजति, किंचित् करोति इत्यधिकम् ह. 8. उदाहरणमिदं नास्ति क. 9. वाक्यमिदं नास्ति इ. 10. अधीते ब.क. 11. देवदत्तः इत्यधिकम् क. 12. उताहो अधीते इत्यधिकम् इ.ड.ह. 13. अधीते ब.इ. 14. अनन्तरम् – वक्ष्यति नास्ति क. 15 – 16. नास्ति ब.क.इ. 17. वाक्यमिदं नास्ति ड. 18. धातूनां इत्यधिकम् ब. ड .इ. 19. गत्यर्थलोट् नास्ति ब. 20. गत्यर्थलोटा नास्ति क. 21. सर्वमन्यत् ड. 22. एव इत्यधिकम् क.